श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७

*हिरण्यगर्भोत्पत्तिवर्णनं, हिरण्यगर्भतपश्चरणवर्णनं,*
*वैकुण्ठस्वरूपवर्णनं, भगवत्स्वरूपसाक्षात्कारवर्णनं*
*भगवदनुग्रहवर्णनं च*

एवं देव चतुर्दशात्मकजगद्रूपेण जातः पुन-
    स्तस्योर्ध्वं खलु सत्य लोकनिलये जातोऽसि धाता स्वयम्।
यं शंसन्ति हिरण्यगर्भमखिलत्रैलोक्यजीवात्मकं
    योऽभूत् स्फीतरजोविकारविकसन्नानासिसृक्षारसः॥ १ ॥

सोऽयं विश्वविसर्गदत्त हृदयः सम्पश्यमानस्स्वयं
    बोधं खल्वनवाप्य विश्वविषयं चिन्ताकुलस्तस्थिवान्।
तावत्त्वं जगतांपते तपतपेत्येवं हि वैहायसीं
    वाणीमेनमशिश्रवः श्रुतिसुखां कुर्वंस्तपःप्रेरणाम्॥ २ ॥

कोऽसौ मामवदत् पुमानिति जलापूर्णे जगन्मण्डले
    दिक्षूद्वीक्ष्य किमप्यनीक्षितवता वाक्यार्थमुत्पश्यता।
दिव्यं वर्षसहस्रमात्ततपसा तेन त्वमाराधित-
    स्तस्मै दर्शितवानसि स्वनिलयं वैकुण्ठमेकाद्भुतम्॥ ३ ॥

माया यत्र कदापि नो विकुरुते भाते जगद्भ्यो बहिः
    शोकक्रोधविमोहसाध्वसमुखा भावास्तु दूरं गताः।
सान्द्रानन्दझरी च यत्र परमज्योतिः प्रकाशात्मके
    तत्ते धाम विभावितं विजयते वैकुण्ठरूपं विभो॥ ४ ॥

यस्मिन्नाम चतुर्भुजा हरिमणिश्यामावदातत्विषो
    नानाभूषणरत्नदीपितदिशो राजद्विमानालयाः।

भक्तिप्राप्ततथाविधोन्नतपदा दीव्यन्ति दिव्या जना-
    स्तत्ते धाम निरस्तसर्वशमलं वैकुण्ठरूपं जयेत्॥ ५॥

नानादिव्यवधूजनैरभिवृता विद्युल्लतातुल्यया
    विश्वोन्मादनहृद्यगात्रलतया विद्योतिताशान्तरा।
त्वत्पादांबुजसौरभैककुतुकाल्लक्ष्मीः स्वयं लक्ष्यते
    यस्मिन् विस्मयनीय दिव्य विभवं तत्ते पदं देहि मे॥ ६॥

तत्रैवं प्रतिदर्शिते निजपदे रत्नासनाध्यासितं
    भास्वत्कोटिलसत्किरीटकटकाद्याकल्पदीप्राकृति।
श्रीवत्साङ्कितमात्तकौस्तुभमणिच्छायारुणं कारणं
    विश्वेषां तव रूपमैक्षत विधिस्तत्ते विभो भातु मे॥ ७॥

काळांभोदकळायकोमळरुचीचक्रेण चक्रं दिशा-
    मावृण्वान मुदारमन्दहसितस्यन्दप्रसन्नाननम्।
राजत्कम्बुगदारिपङ्कजधर श्रीमद्भुजामण्डलं
    स्रष्टुस्तुष्टिकरं वपुस्तव विभो मद्रोगमुद्वासयेत्॥ ८॥

दृष्ट्वा सम्भृतसम्भ्रमः कमल भूस्त्वत् पादपाथोरुहे
    हर्षावेशवशंवदो निपतितः प्रीत्या कृतार्थीभवन्।
जानास्येव मनीषितं मम विभो ज्ञानं तदापादय
    द्वैताद्वैत भवत् स्वरूप परमित्याचष्ट तं त्वां भजे॥ ९॥

आताम्रे चरणे विनम्रमथ तं हस्तेन हस्ते स्पृशन्
    बोधस्ते भविता न सर्गविधिभिर्बन्धोऽपि सञ्जायते।
इत्याभाष्य गिरं प्रतोष्य नितरां तच्चित्तगूढः स्वयं
    सृष्टौ तं समुदैरयः स भगवन्नुल्लासयोल्लाघताम्॥ १०॥

**********